# Shri Lakshminrisimha Prapatti

# શ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ

## Document Information

Text title : lakShmInRRisiMhaprapattiH 2

File name : lakShmInRRisiMhaprapattiH2.itx

Category : vishhnu, krishna, rAmAnujasampradAya, prapatti

Location : doc_vishhnu

Author : HH 24th paTTam SrImat Azhagiya singar

Latest update : July 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 8, 2023

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ

॥ શ્રીઃ ॥

શ્રીમતે શ્રીલક્ષ્મીનૃસિંહ પરબ્રહ્મણે નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ ।

યસ્યાભવદ્ભક્તજનાર્તિહન્તુઃ
પિતૃત્વમન્યેષ્વવિચાર્ય તૂર્ણમ્ ।
સ્તમ્ભેઽવતારસ્તમનન્યલભ્યં
લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧॥

શ્રીતાપનીયેઽપ્રતિમપ્રભાવં
શ્રીતૈત્તિરીયેકુચરોગિરીષ્ઠઃ ।
ઇતીવ પક્ષીન્દ્રધરાધરસ્ત્વં
લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૨॥

સંવર્ગ વિદ્યા વિલસત્સ્વરૂપં
સ્તમ્ભૈકડિમ્ભાત્મલસત્પ્રભાવમ્ ।
ત્રૈલોક્યસમ્પૂર્ણનૃસિંહમૂર્તિં
લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૩॥

હિરણ્યદાતારમપીન્દ્રહેતોઃ
હિરણ્યહન્તારમથાષ્ટબાહુમ્ ।
શાન્તં સતાં ઉગ્રં અસત્સમાજે
લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૪॥

સન્તોષહાસેન સદારમાયાં
વ્યાન્તાનનં સ્વર્ણ સટાભિરામમ્ ।
જિહ્વાધરન્યસ્ત રમેક્ષણાન્તં
લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૫॥

સઞ્ચારયોગ્યાં ચ પદાવહન્તં
    શ્રીપાદુકાં ચેઞ્ચુસુતાં રમાં ચ ।
સવ્યેન હસ્તેન પરિષ્વજન્તં
    લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૬॥

શ્રીમદ્ દ્વયાર્થો હ્યહમેવ સત્યં
    ઇતીવ સર્વાન્ પ્રતિબોધયન્તમ્ ।
રમાનૃસિંહન્ત્વવિભક્તરૂપં
    લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૭॥

શ્રીવેઙ્કટેશેન વિવાહકાલે
    સમ્પૂજિતં સર્વવિધોપચારૈઃ ।
શ્રીશઙ્ખચક્રાભયબાહુદીપ્તં
    લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૮॥

અહોબિલં સાનુજ એત્ય રામઃ
    રમાહરેર્યસ્ય ચકાર પૂજામ્ ।
પદ્યૈશ્ચ પઞ્ચામૃત ભોગ્યશબ્દૈઃ
    લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૯॥

સમાશ્રયાર્થન્ત્વપરાધિવર્ગે
    સમાગતે તત્ર નિવૃત્તવક્ત્રમ્ ।
શ્રીવાક્યસન્તુષ્ટ કૃપાર્દ્રનેત્રં
    લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૦॥

સઞ્ચારયોગ્યં પ્રસમીક્ષ્યકાલં
    કાલે કલૌ યસ્ત્વરયાઽભ્યષિઞ્ચત્ ।
શ્રીવાસનામાનમહો મુનીન્દ્રં
    લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૧॥

સમાશ્રિતાનામિહ સેવનાર્થં
    અહોબિલેહ્યદ્યમઠે જ્વલન્તમ્ ।
સુવર્ણડોલાવિલસત્સ્વરૂપં
    લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૨॥

શ્રીવણ્શઠારાતિયતીન્દ્ર પૂર્વૈઃ

સ્થાનેઽભિષિક્તૈર્યતિરાજચન્દ્રૈઃ ।
સમ્પૂજિતં હ્યાત્મદમાત્મદાનાં
લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૩॥

અહોબિલે ગારુડશૈલમધ્યે
કૃપાવશાત્ કલ્પિત સન્નિધાનમ્ ।
લક્ષ્મ્યા સમાલિઙ્ગિતવામભાગં
લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૪॥

લક્ષ્મીનૃસિંહાર્ચન હૃષ્ટચિત્તઃ
ભક્ત્યૈવ વેદાન્તગુરુર્યતીન્દ્રઃ ।
લક્ષ્મીનૃસિંહસ્ય શુભાં પ્રપત્તિં
ચક્રે જનાનાં નિખિલાર્થસિદ્ધ્યૈ ॥ ૧૫॥

ઇતિ શ્રીમદ્ભિઃ શ્રીવણશઠકોપ પરાઙ્કુશયતીન્દ્ર
મહાદેશિકૈરનુગૃહિતા શ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ સમાપ્તા ।

Composed by HH 24th paTTam SrImat Azhagiya singar

---

*Shri Lakshminrisimha Prapatti*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*